Roll No.……………………….

Signature of Invigilator ………

| Paper Code |
|---|
| BV-204 |

# पतंजलि विश्वविद्यालय

## University of Patanjali

## Examination August-2021

### बी. ए. व्याकरण, द्वितीयसत्रम्

### व्याकरणम्, चतुर्थपत्रम्

### वैदिकसाहित्यम्

**समयः - होरात्रयम्** **पूर्णाङ्काः ७०**

---

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति, अङ्कनिर्देशः प्रतिखण्डं द्रष्टव्यः, सर्वे प्रश्नाः समाधेयाः।

**( खण्ड -क )**

**वेदतः ( वागाम्भृणी-नासदीयम् )**

१. उपर्युक्तसूक्तेषु स्मृताः केचन पञ्च मन्त्रा लेखनीयाः। **( 1 x5 =5 )**

पाठ्क्रमे निर्धारिताः केचन पञ्चमन्त्राः लेखनीयाः।

२. पृष्टेषु पञ्चसु चतुर्णां शब्दार्थपुरस्सरं स्वशब्दैरर्थबोधनम्। **( 2.5 x4 =10 )**

1. अहं सोममाहनसं विभर्म्यहं त्वष्टारमुत पूषणं भगम्।
   अहं दधामि द्रविणं हविष्मते सुप्राव्ये यजमानाय सुन्वते।।
2. न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः।
   आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास।।
3. अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः।
   यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्।।
4. को अद्धा वेद क इह प्र वोचत्कुत आजाता कुत इयं विसृष्टिः।
   अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव।।
5. अहं रुद्राय धनुरा तनोमि ब्रह्मद्विषे शरवे हन्तवा उ।
   अहं जनाय समदं कृणोम्यहं धावापृथिवी आ विवेश।

३. पृष्टानां पञ्चानां मन्त्राणाम् ऋषिदेवताछन्दांसि ज्ञापनीयानि। **( 1 x5 =5 )**

1. अहमेव वातइव प्र ……………… ।।
2. नासदासीन्नो सदासीत्तदानीं।
3. इयं विसृष्टिर्यत आबभूव ………।।
4. मया सो अन्नमत्ति यो …….।।
5. कामस्तदग्रे समवर्त ………………….।।
6. अहं सुवे पितरमस्य ……………।।

## ( खण्ड -ख )

### ( दर्शनतः )

१. द्वयोः सूत्रयोः अग्रे पञ्च सूत्राणि लेखनीयानि। ( 2.5 x2 =5 )

1. निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत्। 2. तज्जयात् प्रज्ञाऽलोकः।

२. पृष्टानां पञ्चानां सूत्राणामर्था बोधनीयाः। ( 1 x5 =5 )

1. त्रयमेकत्र संयमः। 2. मैत्र्यादिषु बलानि। 3. ते व्यक्तसूक्ष्मा गुणात्मानः।

4. पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति।

5. प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः।

३. पृष्टेषु त्रिषु द्वयोर्विषयात्मकप्रश्नयोः समाधानम्। ( 2.5 x2 =5 )

1. कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम् व्याख्येया।

2. जन्मौषधिमन्त्रतपः समाधिजाः सिद्धयः समाधेया।

3. धारणा का भवति ज्ञापनीया।

## ( खण्ड -ग )

### ( उपनिषत्तः )

१. पृष्टेषु सप्तसु पञ्चानां मन्त्राणां पूर्त्तिः करणीया। ( 2 x5 =10 )

1. श्रोत्रस्य श्रोत्रं ..................।। 2. यन्मनसा न मनुते .......................।।
3. न तत्र चक्षुर्गच्छति ......... ।। 4. केनेषितं पतति प्रेषितं .................।।
5. यत्प्राणेन न प्राणिति .........।। 6. यद्वाचाऽनभ्युदितं .........................।।
7. यच्छ्रोत्रेण न शृणोति ..........।।

२. पृष्टेषु पञ्चसु चतुर्णां विषयात्मकप्रश्नानां समाधानम्। ( 2.5 x4 =10 )

1. केनोपनिषदि कति खण्डाः सन्ति।
2. केनोपनिषद्रीत्या परमात्मनः किं स्वरूपम्?
3. धीराः प्रेत्यास्माल्लोकादमृता भवन्ति इत्यस्यकोऽभिप्रायः?
4. इन्द्रियसमूहेन किं न प्राप्यते?
5. केन शब्दस्य कोऽभिप्रायः?

## ( खण्ड -घ )

### ( गीतातः )

१. पृष्टेषु त्रिषु द्वयोः श्लोकानां पूर्त्तिः करणीया। ( 2.5 x2 =5 )

1. यस्मान्नोद्विजते .........................।। 2. ये तु सर्वाणि.....................।।

3. समः शत्रौ च मित्रे .................. ।।

२. पृष्टानां पञ्चानां श्लोकानां पदच्छेदविभक्तिसमासा लेखनीयाः। ( 2 x5 =10 )

1. यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।

   शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः।।

2. मय्येव मन आधत्स्व मयि बुद्धिं निवेशय।

   निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः।।

3. अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।

   निर्ममो निरहङ्कारः समदुःखसुखः क्षमी।।

4. तेषाम् अहं समुद्धर्ता मृत्युसंसारसागरात्।

   भवामि नचिरात् पार्थ मय्यावेशितचेतसाम्।।

5. यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।

   हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः।।

---------------x---------------